नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

२७ भक्तपरिज्ञा-प्रकिर्णकसूत्रं

षष्ठाय

(चतुर्थ प्रकिर्णकम्)

(मूलसूत्रम् + संस्कृतछाया)

मू. (१) *नमिऊण महाइसयं महानुभावं मुनिं महावीरं ।*
भणिमो भत्तपरिण्णं निअसरणट्ठा परट्ठा य ॥

छा. नत्वा महातिशयं महानुभावं मुनिं महावीरम् ।
भणामो भक्तपरिज्ञां निजस्मरणार्थं परार्थं च ॥

मू. (२) *भवगहणभमणरीणा लहंति निव्वुइसुहं जमल्लीणा ।*
तं कप्पद्दुमकाननसुहयं जिनसासणं जयइ ॥

छा. भवगहनभ्रमणमग्ना लभन्ते निर्वृतिसुखं यदाश्रिताः ।
तत्कल्पद्रुमकाननसुखदं जिनशासनं जयति ॥

मू. (३) *मनुअत्तं जिनवयणं च दुल्लहं पाविऊण सप्पुरिसा ।*
सासयसुहिक्करसिएहिं नाणवसिएहिं होअव्वं ॥

छा. मनुजत्वं जिनवचनं च दुर्लभं प्राप्य सत्पुरुषाः ।
शाश्वतसुखैकरसिकैर्ज्ञानावसितैर्भवितव्यम् ॥

मू. (४) *जं अज्ज सुहं भविण संभरणीअं तयं भवे कल्लं ।*
मग्गंति निरुवसग्गं अपवग्गसुहं बुहा तेणं ॥

छा. यदद्य सुखं भविनः स्मरणीयं तद्भवेत्कल्ये ।
मार्गयन्ति निरुपसर्गमपवर्गसुखं बुधास्तेन ॥

मू. (५) *नरविबुहेसरसुक्खं दुक्खं परमत्थो तयं विंति ।*
परिणामदारुणमसासयं च जं ता अलं तेण ॥

छा. नरविबुधेश्वरसौख्यं दुःखं परमार्थतस्तद् ब्रुवते ।
परिणामदारुणमशाश्वतं च यत्तद् अलं तेन ॥

मू. (६) *जं सासयसुहसाहणमाणाआराहणं जिणिंदाणं ।*
ता तीए जइअव्वं जिनवयणविसुद्धबुद्धीहिं ॥

छा. यत् शाश्वतसुखसाधनमाज्ञाया आराधनं जिनेन्द्राणाम् ।
तत्तस्यां यतितव्यं जिनवचनविशुद्धबुद्धिभिः ॥

मू. (७) तं नाणदंसणाणं चारित्ततवाण जिनपण्णीआणं ।
जं आराहणमिणमो आणाआराहणं विंति ॥

छा. तत् ज्ञानदर्शनयोश्चारित्रतपसोः (च) जिनप्रणीतानाम् ।
यदाराधनमिदमाज्ञाया आराधनं ब्रुवते ॥

मू. (८) पव्वज्जाए अब्भुज्जओऽवि आराहओ अहासुत्तं ।
अब्भुज्जअमरणेणं अविगलमाराहणं लहइ ॥

छा. प्रव्रज्यायामभ्युद्यतोऽपि आराधको यथासूत्रम् ।
अभ्युद्यतमरणेनाविकलामाराधनां लभते ॥

मू. (९) तं अब्भुज्जुअमरणं अमरणधम्मोहि वाऱ्णेअं तिविहं ।
भत्तपरिन्ना इंगिणि पाओवगमं च धीरेहिं ॥

छा. तदभ्युद्यतमरणममरणधर्मभिर्वर्णितं त्रिविधम् ।
भक्तपरिज्ञा इङ्गिनी पादपोपगमनं च (इति) धीरैः ॥

मू. (१०) भत्तपरिन्नामरणं दुविहं सविआरमो य अविआरं ।
सपराक्कमस्स मुणिणो संलिहिअतणुस्स सविआरं ॥

छा. भक्तपरिज्ञामरणं द्विविधं सविचारमविचारं च ।
सपराक्रमस्य मुनेः संलिखिततनोः सविचारम् ॥

मू. (११) अपराक्कमस्स काले अप्पहुप्पंतंमि जं तमविआरं ।
तमहं भत्तपरिन्नं जहापरिन्नं भणिस्सामि ॥

छा. अपरिक्रमणः काले अप्रभवति यत्तदविचारम् ।
तमहं भक्तपरिज्ञं यथापरिज्ञं भणिष्यामि ॥

मू. (१२) धिइबलविअलाणमकालमहुकलिआणमकयकरणाणं ।
निरवज्जमज्जकालिअजईण जुग्गं निरुवसग्गं ॥

छा. धृतिबलविकलानामकालमृत्युकलितानामकृतकरणानाम् ।
निरवद्यमद्यकालीनयतीनां योग्यं निरुपसर्गम् ॥

मू. (१३) परम(पसम)सुहसप्पिवासो असोअहासो सजीविअनिरासो ।
विसयसुहविगयरागो धम्मुज्जमजायसंवेगो ॥

छा. परम(प्रशम)सुखसर्पिपासोऽशोकहासः स्वजीवितनिरासः ।
विषयसुखविगतरागो धर्मोद्यमजातसंवेगः ॥

मू. (१४) निच्छिअमरणावत्थो वाहिग्घत्थो जई गिहत्थो वा ।
भविओ भत्तपरिन्नाइ नायसंसारनिग्गुन्नो ॥

छा. निश्चितमरणावस्थो व्याधिग्रस्तो यतिर्गृहस्थो वा ।
भव्यो भक्तपरिज्ञायां ज्ञातसंसारनैर्गुण्यः ॥

मू. (१५) पच्छायावपरद्धो पियधम्मो दोसदूसणसयण्हो ।
अरहइ पासत्थाईवि दोसदोसिल्लकलिओऽवि ॥

छा. प्रारब्धपश्चात्तापः प्रियधर्मा दोषदूषणसतृष्णः ।
अर्हति पार्श्वस्थादिरपि दोषदोषवत्कलितोऽपि ॥

मू. (१६) *बाहिजरमरणमयरो निरंतरुप्पत्तिनीरनिकुरंबो ।*
परिणामदारुणदुहो अहो दुरंतो भवसमुद्दो ॥

छा. व्याधिजरामरणमकरो निरन्तरोत्पत्तिनीरनिकुरुम्बः ।
परिणामदारुणदुःखोऽहो ! दुरन्तो भवसमुद्रः ॥

मू. (१७) *इअ कलिउण सहरिसं गुरुपामूलेऽभिगम्म विनएणं ।*
भालयलमिलिअकरकमलसेहरो वंदिउं भणइ ॥

छा. इति कलयित्वा सहर्षं गुरुपादमूलेऽभिगम्य विनयेन ।
भालतलमिलितकरकमलशेखरो वन्दित्वा भणति ॥

मू. (१८) *आरुहिअमहं सुपुरिस ! भत्तपरिन्नापसत्थबोहित्थं ।*
निज्जामएण गरुणा इच्छामि भवन्नवं तरिउं ॥

छा. आरुह्याहं सुपुरुष ! भक्तपरिज्ञाप्रशस्तपोतम् ।
निर्यामकेन गुरुणा इच्छामि भवार्णवं तरीतुम् ॥

मू. (१९) *कारुन्नामयनीसंदसुंदरो सोऽवि से गुरू भणइ ।*
आलोअणवयखामणपुरस्सरं तं पवज्जेसु ॥

छा. कारुण्यामृतनिस्यन्दसुन्दरः सोऽपि तस्य गुरुर्भणति ।
आलोचनाव्रतक्षामणापुरस्सरवतत् प्रपद्यस्व ॥

मू. (२०) *इच्छामुत्ति भणित्ता भत्तीबहुमानसुद्धसंकप्पो ।*
गुरुणो विगयावाए पाए अभिवंदिउं विहिणा ॥

छा. इच्छामीति भणित्वा भक्तिबहुमानशुद्धसङ्कल्पः ।
गुरोर्विगतापायौ पादावभिवन्द्य विधिना ॥

मू. (२१) *सल्लं उद्धरिअमणो संवेगुव्वेअतिव्वसद्धाओ ।*
जं कुणइ सुद्धिहेउं सो तेणाराहओ होइ ॥

छा. शल्यमुद्धर्तुमनाः सवनोद्वेगतावश्चद्धाकः ।
यत् करोति शुद्धिहेतो स तेनाराधको भवति ॥

मू. (२२) *अह सो आलोअणदोसवज्जिअं उज्जुअं जहाऽऽयरिअं ।*
बालुव्व बालकालाउ देइ आलोअणं सम्मं ॥

छा. अथ स आलोचनादोषवर्जितं ऋजुकं यथाऽऽचीर्णम् ।
बाल इव बालकालाद्दात्यालोचनां सम्यक् ॥

मू. (२३) *ठविए पायच्छित्ते गणिणा गणिसंपयासमग्गेणं ।*
सम्ममणुमन्निअ तवं अपावमावो पुणो भणइ ॥

छा. स्थापिते प्रायश्चित्ते गणिना गणिसम्पत्समग्रेण ।
सम्यगनुमत्य तपोऽपापभावः पुनर्भणति ॥

मू. (२४) *दारुणदुहजलयरनिअरभीमभयजलहितारणसमत्थे ।*
निप्पच्चवायपोए महव्वए अम्ह उक्खिवसु ॥

छा. दारुणदुःखजलचरनिकरभीमभवजलधितारणसमर्थेन ।
निष्प्रत्यपायं महाव्रतपोतेनास्मान् उत्क्षिप ॥

मू. (२५) *जइऽवि स खंडिअचंडो अखंडमहव्वओ जई जइवि ।*
पव्वज्जवउट्ठावणमुट्ठावणमरिहइ तहावि ॥

छा. यद्यपि स खण्डितचण्डोऽखण्डमहाव्रतो यतिर्यद्यपि ।
प्रव्रज्याव्रतोपस्थापन उत्थानमर्हति तथापि ॥

मू. (२६) *पहुणो सुकयाणत्तिं भव्वा पच्चप्पिणंति जह विहिणा ।*
जावज्जीवपइण्णाणत्तिं गुरुणो तहा सोऽवि ॥

छा. प्रभोः सुकृताज्ञप्तिं भृत्याः प्रत्यर्पयन्ति यथा विधिना ।
यावज्जीवप्रतिज्ञाऽऽज्ञप्तिं गुरोस्तथा सोऽपि ॥

मू. (२७) *जो साइआरचरणो आउट्टिअदंडखंडिअवओ वा ।*
तह तस्सवि सम्ममुवट्ठिअस्स उट्ठावणा भणिआ ॥

छा. यः सातिचारचरणः आकुट्टिकादण्डखण्डितव्रतो वा ।
तथा तस्यापि सम्यगुपस्थितस्योपस्थापना भणिता ॥

मू. (२८) *तत्तो तस्स महव्वयपव्वयभारोनमंतसीसस्स ।*
सीसस्स समारोवइ सुगुरुवि महव्वए विहिणा ॥

छा. ततस्तस्य महाव्रतपर्वतभारावनमच्छीर्षस्य
शीर्षे समारोपति सुगुरुरपि महाव्रतानि विधिना ॥

मू. (२९) *अह हुज्ज देसविरओ सम्मत्तरओ रओ अ जिनधम्मे ।*
तस्सवि अणुव्वयाइं आरोविज्जंति सुद्धाइं ॥

छा. अथ भवेद्देशविरतः सम्यक्त्वरतो रतश्च जिनवचने ।
तस्याप्यनुव्रतान्यारोप्यन्ते शुद्धानि ॥

मू. (३०) *अनियाणोवारमणो हरिसवसविसट्टकंचुयकरालो ।*
पूएइ गुरुं संघं साहम्मिअमाइ भत्तीए ॥

छा. अनिदानोदारमना हर्षवशविसर्पद्रोमाञ्चकञ्चुककरालः ।
पूजयति गुरुं सङ्घं साधर्मिकादिं च भक्त्या ॥

मू. (३१) *निअदव्वमपुव्वजिणिंदभवणजिनबिंबवरपइट्ठासु ।*
विअरइ पसत्थपुत्थयसुतित्थतित्थयरपूआसु ॥

छा. निजद्रव्यमपूर्वजिनेन्द्रभवनजिनबिम्बवरप्रतिष्ठासु ।
वितरति प्रशस्तपुस्तकसुतीर्थतीर्थकरपूजासु ॥

मू. (३२) *जइ सोऽवि सव्वविरईकयानुराओ विसुद्धमइकाओ ।*
छिन्नसयणाणुराओ विसयविसाओ विरत्तो अ ॥

छा. यदि सोऽपि सर्वतिरतिकृतानुरागो विशुद्धमतिकायः ।
ऽअस्वजनानुरागो विषयविरक्तश्च ॥

मू. (३३) *संथारयपव्वज्जं पव्वज्जइ सोऽवि निअम निरवज्जं ।*
सव्वविरइप्पहाणं सामाइअचरित्तमारुहइ ॥

छा. संस्तारकप्रव्रज्यां प्रतिपद्यते सोऽपि नियमान्निरवद्याम् ।
सर्वविरतिप्रधानं सामायिकचारित्रमारोहति ॥

मू. (३४) *अह सो सामाइअधरो पडिवन्नमहव्वओ अ जो साहू ।*
देसविरओ अ चरिमं पच्चक्खामीति निच्छइओ ॥

छा. अथ स सामायिकधरः प्रतिपन्नमहाव्रतश्च यः साधुः ।
देशविरतश्च चरमं प्रत्याख्यामीति निश्चयवान् ॥

मू. (३५) *गुरुगुणगुरुणो गुरुणो पयपंकय नमिअमत्थओ भणइ ।*
भयवं ! भत्तपरिन्नं तुम्हाणुमयं पवज्जामि ॥

छा. गुरुगुणगुरोर्गुरोः पदपङ्कजे नतमस्तको भणति ।
भगवन् ! भक्तपरिज्ञां युष्माकमनुमतां प्रपद्ये ॥

मू. (३६) *आराहणाइ खेमं तस्सेव य अप्पणो अ गणिवसहो ।*
दिव्वेण निमित्तेणं पडिलेहइ इहरहा दोसा ॥

छा. आराधनायां क्षेमं तस्यैव चात्मनश्च गणिवृषभः ।
दिव्येन निमित्तेन प्रतिलिखतीतरथा दोषाः ॥

मू. (३७) *तत्तो भवचरिमं सो पच्चक्खाइत्ति तिविहमाहारं ।*
उक्कोसिआणि दव्वाणि तस्स सव्वाणि दंसिज्जा ॥

छा. ततो भवचरमं स प्रत्याख्याति इति त्रिविधमाहारम् ।
उत्कृष्टानि सर्वाणि द्रव्याणि तस्मै दर्शयेत् ॥

मू. (३८) *पासित्तु ताइं कोई तीरं पत्तस्सिमेहिं किं मज्झ ? ।*
देसं व कोइ भुच्चा संवेगगओ विचिंतेइ ॥

छा. दृष्ट्वा तानि कश्चित्तीरं प्राप्तस्यैभिः किं मम ।
देशं च कश्चिद् भुक्त्वा संवेगगतो विचिन्तयेत् ॥

मू. (३९) *किं वत्तं नोवभुत्तं मे, परिणामासुई सुई ।*
दिट्ठसारो सुहं झाइ, चोअणेसाऽवसीअओ ॥

छा. मयोपभुक्तं सत् किं न त्यक्तं ? शुच्यपि परिणामाशुचि ।
दृष्टसारः सुखं ध्यायति चोदनैषाऽवसीदतः ॥

मू. (४०) *उअमरलसोहणट्ठा समाहिपाणं मणुन्नमेसोऽवि ।*
महुरं पज्जेअव्वो मंदं च विरेयणं खमओ ॥

छा. उदरमलशोधनार्थं समाधिपानं मनोज्ञमेषोऽपि ।
मधुरं पातव्यः मन्दं च विरेचनं क्षपकः ॥

मू. (४१) एलतयनागकेसरतमालपत्तं ससक्करं दुद्धं ।
पाऊण कढिअसीअलसमाहिपाणं तओ पच्छा ।।

छा. एलात्वगनागकेशरतमालपत्रयुतं सशर्करं दुग्धम् ।
पाययित्वा कथितशीतलसमाधिपानं ततः पश्चात् ।।

मू. (४२) महुरविरेअणमेसो कायव्वो फोफलाइदव्वेहिं ।
निव्वाविओ अ अग्गी समाहिमेसो सुहं लहइ ।।

छा. मधुरविरेचनमेष कर्त्तव्यः पुंस्फलादिद्रव्यैः ।
निर्वापिताग्निश्च समाधिमेष सुखं लभते ।।

मू. (४३) जावज्जीवं तिविहं आहारं वोसिरइ इहं खवगो ।
निज्जवगो आयरिओ संघस्स निवेअणं कुणइ ।।

छा. यावज्जीवं त्रिविधमाहारं व्युत्सृजतीह क्षपकः ।
निर्यापक आचार्य सङ्घस्य निवेदनं करोति ।।

मू. (४४) आराहणपच्चइअं खमगस्स य निरुवसग्गपच्चइअं ।
तो उस्सग्गो संघेण होइ सव्वेण कायव्वो ।।

छा. आराधनाप्रत्ययं क्षपकस्य च निरुपसर्गप्रत्ययम् ।
तत उत्सर्ग सङ्घेन भवति सर्वेण कर्त्तव्यः ।।

मू. (४५) पच्चक्खाविंति तओ तं ते खमयं चउव्विहाहारं ।
संघसमुदायमज्झे चिइवंदनपुव्वयं विहिणा ।।

छा. प्रत्याख्यापयन्ति ततस्तं ते क्षपकं चतुर्विधाहारम् ।
सङ्घसमुदायमध्ये चैत्यवन्दनपूर्वकं विधिना ।।

मू. (४६) अहवा समाहिहेउं सागारं वयइ तिविहमाहारं ।
तो पाणयंपि पच्छा वोसिरिअव्वं जहाकालं ।।

छा. अथवा समाधिहेतोः साकारं त्यजति त्रिविधमाहारम् ।
ततः पानकमपि पश्चाद् व्युत्सृष्टव्यं यथाकालम् ।।

मू. (४७) तो सो नमंतसिरसंघडंतकर कमलसेहरो विहिणा ।
खामेइ सव्वसंघं संवेगं संजणेमाणो ।।

छा. ततः स नमच्छिरःसंघटमानकरकमलशेखरो विधिना ।
क्षमयति सर्वसङ्घंसंवेगं संजनयन् ।।

मू. (४८) आयरिअ उवज्झाए सीसे साहम्मिए कुलगणे य ।
जे मे केइ कसाया सव्वे तिविहेण खामेमि ।।

छा. आचार्योपाध्यायाः शिष्याः साधर्मिकाश्च कुलगणौ च ।
ये मया केचित् कषायिताः सर्वान् त्रिविधेन क्षमयामि ।।

मू. (४९) सव्वे अवराहपए खामेह (मि) अहं खमेउ मे भयवं ।
अहमवि खमामि सुद्धो गुणसंघायस्स संघस्स ।।

छा. सर्वाण्यपराधपदानि क्षमयाम्यहं क्षाम्यतु मयि भगवन् ।
अहमपि क्षमयामि शुद्धो गुणसङ्घातस्य सङ्घस्य ॥

मू. (५०) *इअ वंदणखमणगरिहणाहिं भवसयसमज्जिअं कम्मं ।*
उवणेइ खणेण खयं मिआवई रायपत्तिव्व ॥

छा. इति वन्दनक्षामणागर्हणीभवशतसमर्जितं कर्म्म ।
उपनयति क्षणेन क्षयं राजपत्नी मृगावतीव ॥

मू. (५१) *अह तस्स महव्वयसुट्ठिअस्स जिनवयणभाविअमइस्स ।*
पच्चक्खायाहारस्स तिव्वसंवेगसुहयस्स ॥

छा. अथ तस्य महाव्रतसुस्थितस्य जिनवचनभावितमतेः ।
प्रत्याख्याताहारस्य तीव्रसंवेगसुखगस्य ॥

मू. (५२) *आराहणलाभाओ कयत्थमप्पाणयं मुणंतस्स ।*
कलुसकलतरणलट्ठिं अनुसट्ठिं देइ गणिवसहो ॥

छा. आराधनालाभात् कृतार्थमात्मानं मन्यमानस्य ।
कलुषकलतरणयष्टिमनुशास्तिं ददाति गणिवृषभः ॥

मू. (५३) *कुग्गहपरूढमूलं मूला उच्छिंद वच्छ ! मिच्छत्तं ।*
भावेसु परमतत्तं सम्मत्तं सुत्तनीईए ॥

छा. कुग्रहप्ररूढमूलं मूलादुच्छिन्द्धि वत्स ! मिथ्यात्वम् ।
भावय परमतत्वं सम्यक्त्वं सूत्रनीत्या ॥

मू. (५४) *भत्तिं च कुणसु तिव्वं गुणाणुरागेण वीअरायाणं ।*
तह पंचनमुक्कारे पवयणसारे रइं कुणसु ॥

छा. भक्तिं च कुरु तीव्रां गुणानुरागेण वीतरागाणाम् ।
तथा पञ्चनमस्कारे प्रवचनसारे रतिं कुरु ॥

मू. (५५) *सुविहिअहिअनिज्झाए सज्झाए उज्जुओ सया होसु ।*
निच्चं पंचमहव्वयरक्खं कुण आयपच्चक्खं ॥

छा. सुविहितहित(हृदय)निध्यातें स्वाध्याये उद्यतः सदा भव ।
नित्यं पञ्चमहाव्रतरक्षां कुर्वात्मप्रत्यक्षाम् ॥

मू. (५६) *उज्झसु निआणसल्लं मोहमहल्लं सुकम्मनिस्सल्लं ।*
वसमु अ मुइंदसंदोहनिंदिए इंदिअमयंदे ॥

छा. उज्झ निदानशल्यं मोहमहत्तरं सुकर्मनिशल्यम् ।
ताम्य च मुनीन्द्रसन्दोहनिन्दितानिन्द्रियमृगेन्द्रान् ॥

मू. (५७) *निव्वाणसुहावाए विइन्ननिरयाइदारुणावाए ।*
हणसु कसायपिसाए विसयतिसाए सइसहाए ॥

छा. निर्वाणसुखापायान् वितीर्णनरकादिदारुणापातान् ।
जहि कषायपिशाचान् विषयतृष्णायाः सदा सहायान् ॥

मू. (५८) *काले अपहुप्पंते सामन्ने सावसेसिए इण्हिं ।*
मोहमहारिउदारुणअसिलट्ठिं सुणसु अणुसट्ठिं ।।

छा. कलेऽप्रभवति श्रामण्ये सावशेषिते इदानीम् ।
मोहमहारिपुदारुणासियष्टिं शृण्वनुशास्तिम् ।।

मू. (५९) *संसारमूलबीअं मिच्छत्तं सव्वहा विवज्जेहि ।*
सम्मत्ते दढचित्तो होसु नमुक्कारकुसलो अ ।।

छा. संसारमूलबीजं मिथ्यात्वं सर्वथा विवर्जय ।
सम्यक्त्वे दृढचित्तो भव नमस्कारकुशलश्च ।।

मू. (६०) *मगतिण्हिआ तोअं मन्नंति नरा जहा सतण्हाए ।*
सुक्खइं कुहम्माओ तहेव मिच्छत्तमूढमणो ।।

छा. मृगतृष्णासु तोयं मन्वते नरा यथा स्वतृष्णया ।
सौख्यानि कुधर्मात् तथैव मिथ्यात्वमूढमनाः ।।

मू. (६१) *नवि तं करेइ अग्गी नेअ विसं नेअ किण्हसप्पो अ ।*
जं कुणइ नरस्सेहं तिव्वं जीवस्स मिच्छत्तं ।।

छा. नैव तत्करोत्यग्नि नैव विषं नैव कृष्णसर्पश्च ।
यं करोति महादोषं तीव्रं जीवस्य मिथ्यात्वम् ।।

मू. (६२) *पावइ इहेव वसणं तरुमिणिदत्तुव्व दारुणं पुरिसो ।*
मिच्छत्तमोहिअमणो साहुपओसाउ पावाओ ।।

छा. प्राप्नोतीहैव व्यसनं तुरुमिणीदत्त इव दारुणं पुरुषः ।
मिथ्यात्वमोहितमनाः साधुप्रद्वेषात् पापात् ।।

मू. (६३) *मा कासि तं पमायं सम्मत्ते सव्वदुक्खनासणए ।*
जं सम्मत्तपइट्ठाइं नाणतवविरिअचरणाइं ।।

छा. मा कार्षीस्त्वं प्रमादं सम्यक्त्वे सर्वदुःखनाशके ।
यत्सम्यक्त्वप्रतिष्ठानि ज्ञानतपोवीर्यचरणानि ।।

मू. (६४) *भावानुरायपेमानुरायसुगुणानुरायरत्तो अ ।*
धम्मानुरायरत्तो अ होसु जिनसासणे निच्चं ।।

छा. भावानुराग–प्रेमानुराग–सुगुणानुरागरक्तश्च ।
धर्मानुरागरक्तश्च भव जिनशासने नित्यम् ।।

मू. (६५) *दंसणभट्ठो भट्ठो न हु भट्ठो होइ चरणपब्भट्ठो ।*
दंसणमनुपत्तस्स हु परिअडणं नत्थि संसारे ।।

छा. दर्शनभ्रष्टो भ्रष्टो नैव भ्रष्टो भवति चरणप्रभ्रष्टः ।
दर्शनमनुप्राप्तस्य पर्यटनं नास्त्येव संसारे ।।

मू. (६६) *दंसणभट्ठो भट्ठो दंसणभट्ठस्स नत्थि निव्वाणं ।*
सिज्झंति चरणरहिआ दंसणरहिआ न सिज्झंति ।।

छा. दर्शनभ्रष्टो भ्रष्टो भ्रष्टदर्शनस्य नास्ति निर्वाणम् ।
सिद्धयन्ति चरणरहिता दर्शनरहिता न सिध्यन्ति ॥

मू. (६७) *सुद्धे सम्मत्ते अविरओऽवि अजेइ तित्थयरनामं ।*
जह आगमेसिभद्दा हरिकुलपहुसेणिआईया ॥

छा. शुद्धे सम्यक्त्वेऽप्यविरतोऽपर्जयति तीर्थकरनाम ।
यथाऽऽगमिष्यद्भद्रा हरिकुलप्रभुश्रेणिकादिकाः ॥

मू. (६८) कल्लाणपरंपरयं लहंति जीवा विसुद्धसम्मत्ता ।
सम्मद्दंसणरयणं नऽग्घइ ससुरासुरे लोए ॥

अ.) *कल्याणपरम्परां लभन्ते जीवा विशुद्धसम्यक्त्वाः ।*
सम्यगदर्शनरत्नं नार्घति सुरासुरे लोके ॥

मू. (६९) *तेलुक्कस्स पहुत्तं लद्धूणवि परिवडंति कालेणं ।*
सम्मत्तं पुण लद्धुं अक्खयसुक्खं लहइ मुक्खं ॥

छा. त्रैलोक्यस्य प्रभुत्वं लब्ध्वाऽपि परिपतन्ति कालेन ।
सम्यक्त्वं पुनर्लब्ध्वाऽक्षयसौख्यं लभते मोक्षम् ॥

मू. (७०) *अरिहंतसिद्धचेइयपवयणआयरिअसव्वसाहूसुं ।*
तिव्वं करेसु भत्तिं तिगरणसुद्धेण भावेणं ॥

छा. अर्हत्सिद्धचैत्यप्रवचनाचार्यसर्वसाधुषु ।
तीव्रां कुरु भक्तिं त्रिकरणशुद्धेन भावेन ॥

मू. (७१) *एगावि सा समत्था जिनभत्ती दुग्गइ निवारेउं ।*
दुलहाइं लहावेउं आसिद्धि परंपरसुहाइं ॥

छा. एकाऽपि सा समर्था जिनभक्तिर्दुर्गतिं निवारयितुम् ।
दुर्लभानि लम्भयितुं आसिद्धेः परम्परसुखानि ॥

मू. (७२) *विज्जावि भत्तिमंतस्स सिद्धिमुवयाइ होइ फलया य ।*
किं पुण निव्वुइविज्जा सिज्झिहिइ अभत्तिमंतस्स ॥

छा. विद्याऽपि भक्तिमतः सिद्धिमुपयाति भवति फलदा च ।
किं पुनर्निर्वृतविद्या सेत्स्यत्यभक्तिमतः ॥

मू. (७३) *तेसिं आराहणनायगाण न करिज्ज जो नरो भत्तिं ।*
थणिअंपि उज्जमंतो सालिं सो ऊसरे ववइ ॥

छा. तेषामाराधनानायकानां न कुर्याद् यो नरो भक्तिम् ।
बाढमप्युद्यच्छन् शालिं स ऊषरे वपति ॥

मू. (७४) *बीएण विणा सस्सं इच्छइ सो वासमब्भएण विणा ।*
आराहणमिच्छंतो आराहयभत्तिमकरंतो ॥

छा. बीजेन विना शस्यमिच्छति स वर्षमभ्रकेण विना ।
आराधनामिच्छन् आराधकभक्तिमकुर्वन् ॥

मू. (७५) उत्तमकुलसंपत्तिं सुहनिप्फत्तिं च कुणइ जिनभत्ती ।
मणियारासिट्ठिजीवस्स दुद्दुरस्सेव रायगिहे ॥

छा. उत्तमकुलसंप्राप्तिं सुखनिष्पत्तिं च करोति जिनभक्तिः ।
मणिकारश्रेष्ठिजीवस्य दुर्दुरस्येव राजगृहे ॥

मू. (७६) आराहणापुरस्सरमणन्नहियओ विसुद्धलेसाओ ।
संसारक्खयकरणं तं मा मुंची नमुक्कारं ॥

छा. आराधनापुरस्सरमनन्यहृदयो विशुद्धलेश्याकः ।
संसारक्षयकरणं तं मा मुञ्च नमस्कारम् ॥

मू. (७७) अरिहंतनमुक्कारोऽवि हविज्ज जो मरणकाले ।
सो जिनवरेहिं दिट्ठो संसारुच्छेअणसमत्थो ॥

छा. अर्हन्नमस्कारो भवेदेकोऽपि यो मरणकाले ।
जिनवरैः स संसारोच्छेदनसमर्थो दृष्टः ॥

मू. (७८) मिंठो किलिट्ठकम्मो नमो जिणाणंतिसुकयपणिहाणो ।
कमलदलक्खो जक्खो जाओ धोलत्ति सूलिहओ ॥

छा. मेण्ठः क्लिष्टकर्मा नमो जिनेभ्य इति सुकृतप्रणिधानः ।
कमलदलाख्यो यक्षो जातश्चौर इति शूलिहतः ॥

मू. (७९) भावनमुक्कारविवज्जिआइं जीवेण अकयकरणाइं ।
गहियाणि अ मुक्काणि अ नंतसो दव्वलिंगाइं ॥

छा. भावनमस्कारविवर्जितानि जीवेनाकृतकरणानि ।
गृहीतानि च मुक्तानि चाऽनन्तशो द्रव्यलिङ्गानि ॥

मू. (८०) आराहणापडागागहणे हत्थो भवे नमोक्कारो ।
तह सुगइमग्गगमणे रहुव्व जीवस्स अप्पडिहो ॥

छा. आराधनापताकाग्रहणे हस्तो भवेन्नमस्कारः ।
तथा सुगतिमार्गगमने रथ इव जीवस्याप्रतिहतः ॥

मू. (८१) अन्नाणीऽवि अ गोवो आराहित्ता मओ नमुक्कारं ।
चंपाए सिट्ठिसुओ सुदंसणो विस्सुओ जाओ ॥

छा. अज्ञान्यपि च गोप आराध्य नमस्कारं मृतः ।
चम्पायां श्रेष्ठिसुतः सुदर्शनो विश्रुतो जातः ॥

मू. (८२) विज्जा जहा पिसायं सुट्ठुवउत्ता करेइ पुरिसवसं ।
नाणं हिअयपिसायं सुट्ठुवउत्तं तह करेइ ॥

छा. विद्या यथा पिशाचं सुष्ठूपयुक्ता करोति पुरुषवशम् ।
ज्ञानं हृदयपिशाचं सुष्ठूपयुक्तं तथा करोति ॥

मू. (८३) उवसमइ किण्हसप्पो जह मंतेण विहिणा पउत्तेणं ।
तह हिययकिण्हसप्पो सुट्ठुवउत्तेण नाणेणं ॥

छा. उपशाम्यति कृष्णसर्पो यथा मन्त्रेण विधिना प्रयुक्तेन ।
तथा हृदयकृष्णसर्प सुष्ठूपयुक्तेन ज्ञानेन ।।

मू. (८४) *जह मक्कडओ खणमवि मज्झत्थो अच्छिउं न सक्केइ ।*
तह खणमवि मज्झत्थो विसएहिं विणा न होइ मणो ।।

छा. यथा मर्कटः क्षणमपि मध्यस्थः स्थातुं न शक्नोति ।
तथा क्षणमपि [illegible] विषयैर्विना न भवति मनः ।।

मू. (८५) *तम्हा स उट्ठिउमणो मणमक्कडओ जिनोवएसेणं ।*
काउं सुत्तनिबद्धो रामेअव्वो सुहज्झाणे ।।

छा. तस्मात्स उत्थातुमना मनोमर्कटो जिनोपदेशेन ।
कृत्वा सूत्रनिबद्धो रमयितव्यः शुभे ध्याने ।।

मू. (८६) *सूई जहा ससुत्ता न नस्सई कयवरंमि पडिआवि ।*
जीवोऽवि तह ससुत्तो न नस्सइ गओवि संसारे ।।

छा. शूची यथा ससूत्रा न नश्यति कचवरे पतिताऽपि ।
जीवोऽपि तथ ससूत्रो न नश्यति गतोऽपि संसारे ।।

मू. (८७) *खंडसिलोगेहि जवो जइ ता मरणाउ रक्खिओ राया ।*
पत्तो अ सुसामन्नं किं पुण जिनउत्तसुत्तेणं ।।

छा. खण्डश्लोकैर्यवर्षिर्यदि तावन्मरणाद्रक्षितो राजा ।
प्राप्तश्च सुश्रामण्यं किं पुनर्जिनोक्तसूत्रेण ।।

मू. (८८) *अहवा चिलाइपुत्तो पत्तो नाणं तहाऽमरत्तं च ।*
उवसमविवेगसंवरपयसुमरणमित्तसुअनाणो ।।

छा. अथवा चिलातीपुत्रो ज्ञानं प्राप्तस्तथाऽमरत्वं च ।
उपशमविवेकसंवरपदस्मरणमात्रश्रुतज्ञानः ।।

मू. (८९) *परिहर छज्जीववहं सम्मं मनवयणकायजोगेहिं ।*
जीवविसेसं नाउं जावज्जीवं पयत्तेणं ।।

छा. परिहर षड्जीववधं सम्यग् मनोवचनकाययोगैः ।
जीवविशेषं ज्ञात्वा यावज्जीवं प्रयत्नेन ।।

मू. (९०) *जह ते न पिअं दुक्खं जाणिअ एमेव सव्वजीवाणं ।*
सव्वायरमुवउत्तो अत्तोवम्मेण कुणसु दयं ।।

छा. यथा ते न प्रियं दुःखं ज्ञात्वैवमेव सर्वजीवानाम् ।
सर्वादरेणोपयुक्त आत्मौपम्येन कुरु दयाम् ।।

मू. (९१) *तुंगं न मंदराओ आगासाओ विसालयं नत्थि ।*
जह तह जयंमि जाणसु धम्ममहिंसासमं नत्थि ।।

छा. तुङ्गं न मन्दरात् आकाशाद्विशालं नास्ति ।
यथा तथा जगति जानीहि धर्मोऽहिंसासमो नास्ति ।।

मू. (९२) *सव्वेवि य संबंधा पत्ता जीवेण सव्वजीवेहिं ।*
तो मारंतो जीवे मारइ संबंधिनो सव्वे ।।

छा. सर्वेऽपि च सम्बन्धाः प्राप्ता जीवेन सर्वजीवैः ।
तन्मारयन् जीवान् मारयति सम्बन्धिनः सर्वान् ।।

मू. (९३) *जीववहो अप्पवहो जीवदया अप्पणो दया होइ ।*
ता सव्वजीवहिंसा परिचत्ता अत्तकामेहिं ।।

छा. जीववध आत्मवधो जीवदयाऽऽत्मनो दया भवति ।
तत्सर्वजीवहिंसा परित्यक्ताऽऽत्मकामैः ।।

मू. (९४) *जावइआइं दुक्खाइं हुंति वउगइगयस्स जीयस्स ।*
सव्वाइं ताइं हिंसाफलाइं निउणं विआणाहि ।।

छा. यावन्ति दुःखानि भवन्ति चतुर्गतिगतस्य जीवस्य ।
सर्वाणि तानि हिंसाफलानि निपुणं विजानीहि ।।

मू. (९५) *जंकिंचि सुहमुआरं पहुत्तणं पयइसुंदरं जं च ।*
आरुग्गं सोहग्गं तं तमहिंसाफलं सव्वं ।।

छा. यत्किञ्चित्सुखमुदारं प्रभुत्वं प्रकृति सुन्दरं यच्च ।
आरोग्यं सौभाग्यं तत्तदहिंसाफलं सर्वम् ।।

मू. (९६) *पाणोऽवि पाडिहेरं पत्तो खूढोऽवि सुंसमारदहे ।*
एगेणविएगदिनऽज्जिएणऽहिंसावयगुणेणं ।।

छा. चण्डालोऽपि प्रातिहार्यं प्राप्तः क्षिप्तोऽपि सुंसुमारह्रदे ।
एकेनाऽप्येकदिनार्जितेनाहिंसाव्रतगुणेन ।।

मू. (९७) *परिहर असच्चवयणं सव्वंपि चउव्विहं पयत्तेणं ।*
संजमवंतावि जओ भासादोसेण लिप्पंति ।।

छा. परिहराऽसत्यवचनं सर्वमपि चतुर्विधं प्रयत्नेन ।
संयमवन्तोऽपि यतो भाषादोषेण लिप्यन्ते ।।

मू. (९८) *हासेण व कोहेण व लोहेण भएण वावि तमसच्चं ।*
मा भणसु भणसु सच्चं जीवहिअत्थं पसत्थमिणं ।।

छा. हास्येन वा क्रोधेन वा लोभेन भयेन वाऽपि तवसत्यम् ।
मा भण भण सत्यं जीवहितार्थं प्रशस्तमिदम् ।।

मू. (९९) *विस्ससणिज्जो माया व होइ पुज्जो गुरुव्व लोअस्स ।*
सयणुव्व सच्चवाई पुरिसो सव्वस्स होइ पिओ ।।

छा. विश्वसनीयो मातेव भवति पूज्यो गुरुरिव लोकस्य ।
स्वजन इव सत्यवादी पुरुषः सर्वस्य भवति प्रियः ।।

मू. (१००) *होउ व जडी सिहंडी मुंडी वा वक्कली व नग्गो वा ।*
लोए असच्चवाई भमइ पासंडचंडालो ।।

छा. भवतु वा जटी शिखवान् मुण्डो वा वल्कली वा नग्नो वा ।
लोकेऽसत्यवादी मन्यते पाषण्डचाण्डालः ॥

मू. (१०१) *अलिअं सइंपि भणिअं विहणइ बहुआइं सच्चवयणाइं ।*
पडिओ नरयंमि वसू इक्केण असच्चवयणेणं ॥

छा. अलीकं सकृदपि भणितं विहन्ति बहुकानि सत्यवचनानि ।
पतितो नरके वसुरेकेनासत्यवचनेन ॥

मू. (१०२) *मा कुणसु धीर बुद्धिं ! अप्पं व बहुं व परधनं घित्तुं ।*
दंतंतरसोहणयं किलिंचमित्तंपि अविदिन्नं ॥

छा. मा कुरु धीर ! बुद्धिमल्पं वा बहु वा परधनं ग्रहीतुम् ।
दन्तान्तरशोधनकं कलाकामात्रमप्यविदत्तम् ॥

मू. (१०३) *जो पुण अत्थं अवहरइ तस्स सो जीविअंपि अवहरइ ।*
जं सो अत्थकएणं उज्झइ जीअं न उण अत्थं ॥

छा. यः पुनरर्थमपहरति तस्य स जीवितमप्यपहरति ।
यत्सोऽर्थकृते उज्झति जीवितं न पुनरर्थम् ॥

मू. (१०४) *तो जीवदयापरमं धम्मं गहिऊण गिण्ह माऽदिन्नं ।*
जिनगणहरपडिसिद्धं लोगविरुद्धं अहम्मं च ॥

छा. ततो जीवदयापरमं धर्मं गृहीत्वा गृहाण माऽदत्तम् ।
जिनगणधरप्रतिषिद्धं लोकविरुद्धमधर्मं च ॥

मू. (१०५) *चोरो परलोगंमिऽवि नारयतिरिएसु लहइ दुक्खाइं ।*
मनुअत्तणेवि दीनो दारिद्दोवद्दुओ होइ ॥

छा. चौरः परलोकेऽपि नारकतिर्यक्षु लभते दुःखानि ।
मनुजत्वेऽपि दीनो दारिद्र्योपद्रुतो भवति ॥

मू. (१०६) *चोरिक्कानिवित्तीए सावयपुत्तो जहा सुहं लहई ।*
किढि मोरपिच्छचित्तिअ गुट्ठीचोराण थलणेसु ॥

छा. चौर्यनिवृत्त्या श्रावकपुत्रो यथा सुखमलभत ।
किढयामयूरपिच्छचित्रितेषु गोष्ठिकचौराणां चरणेषु ॥

मू. (१०७) *रक्खाहि बंभचेरं बंभगुत्तीहिं नवहिं परिसुद्धं ।*
निच्चं जिणाहि कामं दोसपकामं विआणित्ता ॥

छा. रक्ष ब्रह्मचर्यं ब्रह्मगुप्तिभिर्नवभिः परिशुद्धम् ।
नित्यं जय कामं प्रकामदोषं विज्ञाय ॥

मू. (१०८) *जावइआ किर दोसा इहपरलोए दुहावहा हुंति ।*
आवहइ ते उ सव्वे मेहुणसन्ना मणूसस्स ॥

छा. यावन्तः किल दोषा इहपरलोकयोर्दुःखावहा भवन्ति ।
आवहति तांस्तु सर्वान् मैथुनसंज्ञा मनुष्यस्य ॥

मू. (१०९) *रइअरइतरलजीहाजुएण संकप्पउब्भडफणेणं ।*
विसयबिलवासिणा मयमुहेण विब्बोअरोसेणं ॥

छा. रत्यरतितरलजिह्वायुगेन सङ्कल्पोद्भटफणेन ।
विषयबिलवासिना मदमुखेन विब्बोकरोषेण ॥

मू. (११०) *कामभुअंगेण दट्ठा लज्जानिम्मोअदप्पदाढेणं ।*
नासंति नरा अवसा दुस्सहदुक्खावहविसेणं ।

छा. कामभुजंगेन दष्टा लज्जानिर्मोकदर्पदंष्ट्रेण ।
नश्यन्ति नरा अवशा दुःसहदुःखावहविषेण ॥

मू. (१११) *लब्भइ निरयविअणाओ घोरसंसारसायरुव्वहणं ।*
संगच्छइ न य पिच्छइ तुच्छत्तं कामिअसुहस्स ॥

छा. लभ्यते नरकवेदना घोरसंसारसागरोद्वहनम् ।
संगच्छते न च प्रेक्षते तुच्छत्वं कामिक सुखस्य ॥

मू. (११२) *वम्महसरसयविद्धो गिद्धो वणिउव्व रायपत्तीए ।*
पाउक्खालयगेहे दुग्गंधेऽनेगसो वसिओ ॥

छा. मन्मथशरशतविद्धो गृद्धो वणिगिव राजपत्न्याम् ।
पायुक्षालनगृहे दुर्गन्धेऽनेकश उषितः ॥

मू. (११३) *कामासत्तो न मुणइ गम्मागम्मंपि वेसिआणुव्व ।*
सिट्ठी कुबेरदत्तो निअयसुआसुरयरइरत्तो ॥

छा. कामासक्तो न जानाति गम्यागम्यमपि वैश्यायन इव ।
श्रेष्ठी कुबेरदत्तो निजसुतासुरतरतिरक्तः ॥

मू. (११४) *पडिपिल्लिअ कामकलिं कामग्घत्थासु मुअसु अनुबन्धं ।*
महिलासु दोसविसवल्लरीसु पयइं नियच्छंतो ॥

छा. प्रतिप्रेर्य कामकलिं कामग्रस्तासु मुञ्चानुबन्धम् ।
महिलासु दोषविषवल्लीषु प्रकृतिं नियच्छन् ॥

मू. (११५) *महिला कुलं सुवंसं पियं सुअं मायरं च पिअरं च ।*
विसयंधा अगणंती दुक्खसमुद्दम्मि पाडेइ ॥

छा. महिला कुलं सुवंशं प्रियं सुतं मातरं च पितरं च ।
विषयान्धाऽगणयन्ती दुःखसमुद्रे पातयति ॥

मू. (११६) *नीअंगमाहिं सुपओहराहिं उप्पिच्छमंथरगईहिं ।*
महिलाहि निन्नयाहि व गिरिवरगुरुआवि भिज्जंति ॥

छा. नीचैर्गमाभि सुपयोधराभिरुल्लेक्ष्यमन्थरगतिभिः ।
महिलाभिर्निम्नगाभिरिव गिरिवरगुरुका अपि भिद्यन्ते ॥

मू. (११७) *सुट्ठवि जिआसु सुट्ठवि पिआसु सुट्ठवि पल्लढपेमासु ।*
महिलासु भुअंगीसु व वीसंभं नाम को कुणइ ॥

छा. सुष्ठपि जितासु सुष्ठपि प्रियासु सुष्ठपि प्ररूढप्रेमसु ।
महिलासु भुजङ्गीष्विव विश्रम्भं नाम कः करोति ॥

मू. (११८) *वीसंभनिब्भरंपिहु उवयारपरं परूढपणयंपि ।*
कयविप्पिअं पिअं झत्ति निंति निहणं हयासाओ ॥

छा. विश्रम्भनिर्भरमपि उपकारपरं प्ररूढप्रणयमपि ।
कृतविप्रियं पतिं झटिति नयन्ति निधनं हताशाः ॥

मू. (११९) *रमणीअदंसणाओ सोमालंगीओ गुणनिबद्धाओ ।*
कयविप्पिअं पिअं झत्ति निंति निहणं हयासाओ ॥

छा. रमणीयदर्शनाः सुकुमाराङ्ग्यो गुणनिबद्धाः ।
निवमालतीमाला इव हरन्ति हृदयं महिलाः ॥

मू. (१२०) *किं तु महिलाण तासिं वंसणसुंदेरजनिअमोहाणं ।*
आलिंगणमइरा देइ वज्झमालाण व विनासं ॥

छा. किन्तु महिलानां तासां दर्शनसौन्दर्यजनितमोहानाम् ।
आलिङ्गनमचिराद्दाति वध्यमालानामिव विनाशम् ॥

मू. (१२१) *रमणीण दंसणं चेव सुंदरं होउ संगमसुहेणं ।*
गंधुद्धिय सुरहो मालईइ मलणं पुण विनासो ॥

छा. रमणीनां दर्शनमेव सुन्दरं कृतं सङ्गमसुखेन ।
गन्ध एव सुरभिर्मालत्या मर्दनं पुनर्विनाशः ॥

मू. (१२२) *साकेअपुराहिवइ देवरई रज्जसुक्खपब्भट्ठो ।*
पंगुलहेतुं छूढो वुढो अ नईइ देवीए ॥

छा. साकेतपुराधिपतिर्देवरती राज्यसुखप्रभ्रष्टः ।
पङ्गुहेतोः क्षिप्तो व्यूढश्च नद्या देव्या ॥

मू. (१२३) *सोअसरी दुरिअदरी कवडकुडी महिलिआ किलेसकरी ।*
वइरविरोअणअरणी वुक्खखणी सुक्खपडिवक्खा ॥

छा. शोकसरित् दुरितदरी कपटकुटी महिला क्लेशकरी ।
वैरविरोचनाऽरणिर्दुखखनि सुखप्रतिपक्षा ॥

मू. (१२४) *अमुणिअमणपरिकम्मो सम्मं को नाम नासिउं तरइ ।*
वम्महसरपसरोहे दिट्ठिच्छोहे मयच्छीणं ॥

छा. अज्ञातमनःपरिकर्मा सम्यक् को नाम नंष्टुं शक्नोति ।
मन्मथशरप्रसरौघे दृष्टिक्षोभेमृगाक्षीणाम् ॥

मू. (१२५) *धनमालाओ व दूरुन्नमंतसुपओहराउ वड्ढंति ।*
मोहविसं महिलाओ अलक्कविसं व पुरिसस्स ॥

छा. घनमाला इव दूरोन्नमत्सुपयोधरा वर्द्धयन्ति ।
मोहविषं महिला अलर्कविषवत्पुरुषस्य ॥

मू. (१२६) *परिहरसु तओ तासिं दिट्ठिं दिट्ठीविसस्स व अहिस्स ।*
जं रमणिनयणबाणा चरित्तपाणे विणासंति ॥

छा. परिहर ततस्तासां दृष्टिं दृष्टिविषस्येवाहेः ।
यद् रमणीनयनबाणाश्चारित्रप्राणान् विनाशयन्ति ॥

मू. (१२७) *महिलासंसग्गीए अग्गी इव जं च अप्पसारस्स ।*
मयणं व मनो मुणिणोऽवि हंत सिग्घं चिअ विलाइ ॥

छा. महिलासंसर्गेण अग्निरिव यद्धात्मसारस्य ।
मदनवन्मनो मुनेरपि हन्त ! शीघ्रमेव विलीयते ॥

मू. (१२८) *जइवि परिचत्तसंगो तवतणुअंगो तहावि परिवडइ ।*
महिलासंसग्गीए कोसाभवणूसिअव्व रिसी ॥

छा. यद्यपि परित्यक्तसङ्गस्तपस्तन्वङ्गस्तथाऽपि परिपतति ।
महिलासंसर्ग्या कोशाभवनोषित ऋषिरिव ॥

मू. (१२९) *सिंगारतरंगाए विलासवेलाइ जुव्वणजलाए ।*
पहसिअफेणाइ मुणी नारिनईए न वुड्डंति ॥

छा. शृङ्गारतरङ्गायां विलासवेलायां यौवनजलायां ।
के के जगति पुरुषा (प्रहसितफेणायां) मुनयः नारीनद्यां बुडन्ति ॥

मू. (१३०) *विसयजलं मोहकलं विलासविब्बोअजलयराइन्नं ।*
मयमयरं उत्तिन्ना तारुन्नमहन्नवं धीरा ॥

छा. विषयजलं मोहकलं विलासविब्बोकजलचराकीर्णम् ।
मदमकरमुत्तीर्णास्तारुण्यमहार्णवं धीराः ॥

मू. (१३१) *अब्भिंतरबाहिरए सव्वे संगे (गंथे) तुमं विवज्जेहि ।*
कयकारिअणुमईहिं कायमणोवायजोगेहिं ॥

छा. अभ्यन्तरबाह्यान् सर्वान् सङ्गान् (ग्रन्थान्) त्वं विवर्जय ।
कृतकारितानुमतिभि कायमनोवागयोगै– ॥

मू. (१३२) *संगनिमित्तं मारइ भणइ अलीअं करेइ चोरिक्कं ।*
सेवइ मेहुण मुच्छं अपरिमाणं कुणइ जीवो ॥

छा. सङ्गनिमित्तं मारयति भणत्यलीकं करोति चौर्यम् ।
सेवते मैथुनं मूर्छामपरिमाणां करोति जीवः ॥

मू. (१३३) *संगो महाभयं जं विहेडिओ सावएण संतेणं ।*
पुत्तेण हिए अत्थमंमि मणिवई कुंचिएण जहा ॥

छा. सङ्गो महाभयं यद्बाधितः श्रावकेण सता ।
पुत्रेण हृतेऽर्थे मुनिपति कुञ्चिकेन यथा ॥

मू. (१३४) *सव्वग्गंथविमुक्को सीईभूओ पसंतचित्तो अ ।*
जं पावइ मुत्तिसुहं न चक्कवट्टीवि तं लहइ ॥

छा. सर्वग्रन्थविमुक्तः शीतीभूतः प्रशान्तचित्तश्च ।
यत्प्राप्नोति मुक्तिसुखं न चक्रवर्त्यपि तत् लभते ॥

मू. (१३५) *निस्सल्लस्सेह महव्वयाइं अक्खंडनिव्वणगुणाइं ।*
उवहम्मंति अ ताइं नियाणसल्लेण मुणिणोऽवि ॥

छा. निशल्यस्येह महाव्रतान्यखण्डनिर्व्रणगुणानि ।
उपहन्यन्ते च तानि निदानशल्येन मुनेरपि ॥

मू. (१३६) *अह रागदोसगब्भं मोहगब्भं च तं भवे तिविहं ।*
धम्मत्थं हीनकुलाइपत्थणं मोहगब्भं च ॥

छा. अथ रागद्वेषगर्भं मोहगर्भं च तद्भवेत्त्रिविधम् ।
धर्मार्थं हीनकुलादि प्रार्थनं मोहगर्भं च तत् ॥

मू. (१३७) *रागेण गंगदत्तो दोसेणं विस्सभूइमाईआ ।*
मोहेण चंडपिंगलमाईआ हुंति विद्दत्ता ॥

छा. रागेण गङ्गदत्तो द्वेषेण विश्वभूत्यादिकाः ।
मोहेन चण्डपिङ्गलाद्याः (निदानेषु) भवन्ति दृष्टान्ताः ॥

मू. (१३८) *अगणिअ जो मुक्खसुहं कुणइ निआणं असारसुहहेउं ।*
सो कायमणिकएणं वेरुलिअमणिं पणासेइ ॥

छा. अगणयित्वा यो मोक्षसुखं करोति नादनभसारसुखहेतोः ।
स काचमणिकृते वैडूर्यमणिं प्रणाशयति ॥

मू. (१३९) *दुक्खक्खय कम्मक्खय समाहिमरणं च बोहिलाभो अ ।*
एअं पत्थेअव्वं न पत्थणिज्जं तओ अन्नं ॥

छा. दुःखक्षयः कर्मक्षयः समाधिमरणं च बोधिलाभश्च ।
एतत् पार्थयितव्यं न प्रार्थनीयं ततोऽन्यत् ॥

मू. (१४०) *उज्झिअनिआणसल्लो निसिभत्तनिअत्तिसमिइगुत्तीहिं ।*
पंचमहव्वयरक्खं कयसिवसुक्खं पसाहेइ ॥

छा. उज्झितनिदानशल्यो निशाभक्तिनिवृत्तिसमितिगुप्तिभिः ।
पञ्चमहाव्रतरक्षां कृतशिवसौख्यां प्रसाधयति ॥

मू. (१४१) *इंदिअविसयपसत्ता पडंति संसारसायरे जीवा ।*
पक्खिव्व छिन्नपक्खा सुसीलगुणपेहुणविहूणा ॥

छा. इन्द्रियविषयप्रसक्ताः पतन्ति संसारसागरे जीवाः ।
पक्षिण इव छिन्नपक्षाः सुशीलगुणपिच्छविहीनाः ॥

मू. (१४२) *न लहइ जहा लिहंतो मुहिल्लिअं अट्ठिअं रसं सुणओ ।*
तो तइ तालु अरसिअं विलिहंतो मन्नए सुक्खं ॥

छा. न लभते यथा लिहन् शुष्कास्थ्नो रसं श्वा ।
स स्वकीयतालुरसं विलिहन् मन्यते सौख्यम् ॥

मू. (१४३) *महिलापसंगसेवी न लहवि किंचिवि सुहं तहा पुरिसो ।*
सो मन्नए वराओ सयकायपरिस्समं सुक्खं ॥

छा. महिलाप्रसङ्गसेवी न लभते किञ्चिदपि सुखं तथा पुरुषः ।
स मनुते वराकः स्वकायपरिश्रमं सौख्यम् ॥

मू. (१४४) *सुट्ठवि मग्गिअंतो कत्थवि केलीइ नत्थि जह सारो ।*
इंदिअविसएसु तहा नत्थि सुहं सुट्ठवि गविट्ठं ॥

छा. सुष्ठपि मार्ग्यमाणः क्वापि कदल्यां यथा नास्ति सारः ।
इन्द्रियविषयेषु तथा नास्ति सुखं सुष्ठपि गवेषितम् ॥

मू. (१४५) *सोएण पवसिअपिआ चक्खूरागेण माहुरो वणिओ ।*
घाणेण रायपुत्तो निहओ जीहाइ सोदासो ॥

छा. श्रोत्रेण प्रोषितपिता चक्षूरागेण माथुरो वणिक् ।
घ्राणेन राजपुत्रो निहतो जिह्वया सौदासः ॥

मू. (१४६) *फासिंदिएण वुड्ढो नट्ठो सोमालिआमहीपालो ।*
इक्किक्केणवि निहया किं पुण जे पंचसु पसत्ता ॥

छा. स्पर्शनेन्द्रियेण वृद्धो नष्टः सुकुमालिकामहीपालः ।
एकैकेनापि निहताः किं पुनर्ये पञ्चसु प्रसक्ताः ॥

मू. (१४७) *विसयावेक्खो निवडइ निरवेक्खो तरइ दुत्तरभवोहं ।*
देवीदेवसमागयभाउयजुअलं व भणिअं च ॥

छा. विषयापेक्षो निपतति निरपेक्षस्तरति दुस्तरभवौघम् ।
देवीदेवसमागतभ्रातृयुगलवद्भणितं च ॥

मू. (१४८) *छलिआ अवयक्खंता निरावयक्खा गया अविग्घेणं ।*
तम्हा पवयणसारे निरावयक्खेण होअव्वं ॥

छा. छलिता अपेक्षमाणा निरपेक्षा गता अविघ्नेन ।
तस्मात्प्रवचनसारे (लब्धे) निरपेक्षेण भवितव्यम् ॥

मू. (१४९) *विसए अवियक्खंता पडंति संसारसायरे घोरे ।*
विसएसु निरावेक्खा तरंति संसारकंतारं ॥

छा. विषयानपेक्षमाणाः पतन्ति संसारसागरे घोरे ।
विषयेषु निरपेक्षास्तरन्ति संसारकान्तारम् ॥

मू. (१५०) *ता धीर ! धीबलेणं दुद्दंते दमसु इंदिअमइंदे ।*
तेणुक्खयपडिवक्खो हराहि आराहणपडागं ॥

छा. तद् धीर ! धृतिबलेन दुर्दान्तान् दाम्येन्द्रियमृगेन्द्रान् ।
तेनोत्खातप्रतिपक्षो हराराधनापताकाम् ॥

मू. (१५१) *कोहाणई विवागं नाऊण य तेसि निग्गहेण गुणं ।*
निग्गिण्ह तेण सुपुरिस ! कसायकलिणो पयत्तेणं ॥

छा. क्रोधादीनां विपाकं ज्ञात्वा च तेषां निग्रहेण गुणम् ।
निगृह्णाण तेन सुपुरुष ! कषायकलीन् प्रयत्नेन ॥

मू. (१५२) *जं अइतिक्खं दुक्खं जं च सुहं उत्तमं तिलोईए ।*
तं जाण कसायाणं वुड्ढिक्खयहेउअं सव्वं ॥

छा. यदतितीक्ष्णं दुःखं यच्च सुखमुत्तमं त्रिलोक्याम् ।
तज्ज्ञानीहि कषायाणां वृद्धिक्षयहेतुकं सर्वम् ॥

मू. (१५३) *कोहेण नंदमाई निहया माणेण फरसुरामाई ।*
मायाइ पंडरज्जा लोहेणं लोहनंदाई ॥

छा. क्रोधेन नन्दाद्या निहता माने परशुरामाद्याः ।
मायया पाण्डुरार्या लोभेन लोभनन्द्यादयः ॥

मू. (१५४) *इअ उवएसामयपाणएण पल्हाइअम्मि चित्तंमि ।*
जाओ सुनिव्वओ सो पाऊण व पाणिअं तिसिओ ॥

छा. इत्युपदेशामृतपानेन प्रह्लादिते चित्ते ।
जातः सुनिर्वृतः स पीत्वेव पानीयं तृषितः ॥

मू. (१५५) *इच्छामो अणुसट्ठिं भंते ! भवपंकतरणदढलट्ठिं ।*
जं जह उत्तं तं तह करेमि विणओणओ भणइ ॥

छा. इच्छामोऽनुशास्तिं भदन्त ! भवपङ्कतरणदृढयष्टिम् ।
यद् ययोक्तं तत्तथा करोमि विनयावनतो भणति ॥

मू. (१५६) *जइ कहवि असुहकम्मोदएण देहम्मि संभवे विअणा ।*
अहवा तण्हाईआ परीसहा से उदीरिज्जा ॥

छा. यदि कथमप्यशुभकर्मोदयेन देहे संभवेद् वेदना ।
अथवा तृषाद्याः परीषहास्तस्योदीरयेयुः ॥

मू. (१५७) *निद्धं महुरं पल्हायणिज्जहिअयंगमं अणलिअं च ।*
तो सेहावेअव्वो सो खवओ पन्नवंतेणं ॥

छा. स्निग्धं मधुरं प्रह्लादनीयं हृदयङ्गममनलीकं च ।
तदा शिक्षयितव्यः स क्षपकः प्रज्ञापयता ॥

मू. (१५८) *संभरसु सुअण ! जं तं मज्झंमि चउव्विहस्स संघस्स ।*
वूढा महापइज्ञा अहयं आराहइस्सामि ॥

छा. स्मर सुजन ! तद् यत् चतुर्विधस्य सङ्घस्य मध्ये ।
अहमाराधयिष्यामीति महाप्रतिज्ञा व्यूढा ॥

मू. (१५९) *अरिहंतसिद्धकेवलिपच्चक्खं सव्वसंघसक्खिस्स ।*
पच्चक्खाणस्स कयस्स भंजणं नाम को कुणइ ॥

छा. अर्हत्सिद्धकेवलिप्रत्यक्षं सर्वसङ्घसाक्षिणः ।
कृतस्य प्रत्याख्यानस्य भङ्गं को नाम करोति ॥

मू. (१६०) *मालुंकीए करुणं खज्जंतो घोरविअणत्तोवि ।*
आराहणं पवन्नो झाणेण अवंतिसुकुमालो ॥

छा. शिवया करुणं खाद्यमानो घोरवेदनार्त्तोऽपि ।
आराधनां प्रतिपन्नो ध्यानेनावन्तीसुकुमालः ॥

मू. (१६१) *मुग्गिल्लगिरिंमि सुकोसलोऽवि सिद्धत्थदइअओ भयवं ।*
वग्घीए खज्जंतो पडिवन्नो उत्तमं अट्ठं ॥

छा. मौद्गल्यगिरौ सुकोशलोऽपि सिद्धार्थदयितो भगवान् ।
व्याघ्र्या खाद्यमानः प्रतिपन्न उत्तममर्थम् ॥

मू. (१६२) *गुट्ठे पाओवगओ सुबंधुणा गोमए पिविअम्मि ।*
डज्झंतो चाणक्को पडिवन्नो उत्तमं अट्ठं ॥

छा. गोष्ठे पादपोपगतः सुबन्धुना गोमये प्रदीप्ते ।
दह्यमानश्चाणक्यः प्रतिपन्न उत्तमार्थम् ॥

मू. (१६३) *रोहीऽगम्मि सत्तीहओ विकुंचेण अग्गिनिवदइओ ।*
तंवेयणमहियासिय पडिवन्नो उत्तमं अट्ठं ॥

छा. रोहितके शक्तिहतोऽपि कुक्षेन अग्निनृपदयित ।
तंवेदनमध्यासित प्रतिपन्न उत्तमं अर्थम् ॥

मू. (१६४) *अवलंबिऊण सत्तं तुमंपि ता धीर ! धीरयं कुणसु ।*
भावेसु अ नेगुन्नं संसारमहासमुद्दस्स ॥

छा. अवलम्ब्य सत्वं त्वमपि तद्धीर ! धीरतां कुरु ।
भावय च नैर्गुण्यं संसारमहासमुद्रस्य ॥

मू. (१६५) *जम्मजरामरणजलो अणाइमं वसणसावयाइन्नो ।*
जीवाण दुक्खहेऊ कट्ठं रुद्दो भवसमुद्दो ॥

छा. जन्मजरामरणजलोऽनादिमान् व्यसनश्वापदाकीर्ण ।
जीवानां दुःखहेतुः कष्टं रुद्रो भवसमुद्रः ॥

मू. (१६६) *धन्नोऽहं जेण मए अनोरपारंमि भवसमुद्दम्मि ।*
भवसय सहस्सदुलहं लद्धं सद्धम्मजाणमिणं ॥

छा. धन्योऽहं येन मयाऽनवकिपारे भवसमुद्रे ।
भवशतसहदुर्लभं लब्धं सद्धर्मयानमिदम् ॥

मू. (१६७) *एअस्स पभावेणं पालिज्जंतस्स सइ पयत्तेणं ।*
जम्मंतरेऽवि जीवा पावंति न दुक्खदोगच्चं ॥

छा. एतस्य प्रभावेण पाल्यमानस्य सकृत् प्रयत्नेन ।
जन्मान्तरेऽपि जीवाः प्राप्नुवन्ति न दुःखदौर्गत्यम् ॥

मू. (१६८) *चिंतामणी अउव्वो एअमपुव्वो अ कप्परुक्खुत्ति ।*
एअं परमो मंतो एअं परमामयसरिच्छं ॥

छा. चिन्तामणिरपूर्व एतदपूर्वश्च कल्पवृक्ष इति ।
एतत् परमो मन्त्र एतत्परमामृतसदृक्षम् ॥

मू. (१६९) *अह मणिमंदिरसुंदरफुरंतजिनगुणनिरंजणुज्जोओ ।*
पंचनमुक्कारसमे पाणे पणओ विसज्जेइ ॥

छा. अथ मनोमन्दिरे सुन्दरस्फुरज्जिनगुणनिञ्जनोद्द्योतः ।
पञ्चनमस्कारसमं प्राणान् प्रणतो विसर्जयति ॥

मू. (१७०) *परिणामविसुद्धीए सोहम्मे सुरवरो महिड्ढीओ ।*
आराहिऊण जायइ भत्तपरिन्नं जहन्नं सो ॥

छा. परिणामविशुद्धया सौधर्मे सुरवरो महर्द्धिकः ।
आराध्य जायते भक्तपरिज्ञां जघन्यां सः ॥

मू. (१७१) *उक्कोसेण गिहत्थो अच्चुअकप्पंमि जायए अमरो ।*
निव्वाणसुहं पावइ साहू सव्वट्ठसिद्धिं वा ॥

छा. उत्कृष्टेन गृहस्थोऽच्युतकल्पे जायतेऽमरः ।
निर्वाणसुखं प्राप्नोति साधुः सर्वार्थसिद्धिं वा ॥

मू. (१७२) *इअ जोइसरजिनवीरभद्दभणिआणुसारिणीमिणमो ।*
भत्तपरिन्नं धन्ना पढंति निसुणंति भावेंति ॥

छा. इति योगीश्वरजिनवीरभद्रभणितानुसारिणीमिमाम् ।
भक्तपरिज्ञां धन्याः पठन्ति शृ ण्वन्ति भावयन्ति ॥

मू. (१७३) *सत्तरिसयं जिणाण व गाहाणं समयखित्तपन्नत्तं ।*
आराहंतो विहिणा सासयसुक्खं लहइ मुक्खं ॥

छा. जिनानां सप्ततं शतमिव गाथानां समयक्षेत्रे प्रज्ञप्तम् ।
तत् आराधयन् विधिना शाश्वतसौख्यं लभते मोक्षम् ॥

२७ चतुर्थप्रकीर्णकम् भक्तपरिज्ञा समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भक्तपरिज्ञाप्रकीर्णकसूत्रस्य पूज्यपाद् आनन्दसागरसूरिणा सम्पादिता संस्कृत छाया परिसमाप्ता ।

❋ ❋ ❋